National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2016; 1(5): 01-03
© 2016 NJHSR
www.sanskritarticle.com

**Dr Saroj gupta,**
associate professor,
satyawati college(m),
University Of Delhi, Delhi

**Correspondence:**
**Dr Saroj gupta,**
associate professor,
satyawati college(m),
University Of Delhi, Delhi

# न्यायदर्शनम् - एकावलोकनम्

**Dr. Saroj Gupta**

नियमेन ईयते इति व्युत्पत्त्यनुसारेण नियमयुक्तो व्यवहार एव न्यायशब्देनाभिधीयते। इममेवार्थमाश्रित्य न्यायालयः इत्यादिकाः प्रयोगाः भवन्ति। प्रसिद्धेन दृष्टातेन साकं सदृशार्थेऽपि न्यायशब्दस्य प्रयोगो भवति। यथा बीजाङ्कुरन्यायः, स्थालीपुलाकन्यायः इत्यादिकाः व्यवहाराः। दार्शनिकानां निकाये तुन्यायशब्दस्यार्थः - नीयतेः प्राप्यते विवक्षितार्थसिद्धिरनेन' इति न्यायः। यथा- प्रतिज्ञा-हेतु-दृष्टान्त-उपनय-निगमनैः साधनैः सिद्धिर्भवति। तथा चोक्तम् न्यायदर्शनमस्य भाष्यकारेण वात्स्यायनेनापि-

**'साधनीयस्यार्थं यावति शब्दसमूहे सिद्धिः**
**सः परिसमाप्यते पंचावयवोपेतवाक्यात्मको न्यायः।**' इति।

अनेन विवेचनेन द्वारायमर्थः सिद्धयति यत् यत्र क्वचन प्रमाणानां साहाय्येन अभिप्रेतस्यार्थस्य सिद्धिः क्रियते तत्र भवति न्यायशब्दस्य प्रयोगः। इममेवार्थमाश्रित्य न्यायदर्शनस्य कृते न्यायशास्त्रशब्दस्य भवति प्रयोगः।
अस्य न्यायशास्त्रस्यानेकानि नामानि सन्ति। तथाहि-आदावस्य शास्त्रस्य आन्विक्षिकी विद्या नामासीत्। 'प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया वर्त्तते या सा आन्विक्षीकी' इति आन्विक्षिकीशब्दस्यार्थः।
इयमान्विक्षिकी विद्यैव कालान्तरे न्यायशास्त्रनाम्ना अथवा तर्कशास्त्रनाम्ना प्रख्याताऽभवत्। यतोऽस्य शास्त्रस्याध्ययनेन वादस्य कलाधिगता भवति, अतः इदम् शास्त्रवादविद्याशब्देनाप्यभिधीयते। अस्मिन् शास्त्रे प्रमाणानाम् माहात्म्यम् अतिशयेन स्वीक्रियते अतएवेदम् प्रमाणशास्त्रमपि कथ्यते।न्यायशास्त्रस्य प्रवर्त्तको महर्षिः गौतमो विद्यते। स एवायम् मुनिः न्यायदर्शनसूत्राणि प्रणिनाय अतएवेदं शास्त्रम् गौतमीयशास्त्रमपि कथ्यते।

**न्यायशास्त्रस्य प्रयोजनं च** प्रमाणेन द्वारा सत्यत्वासत्यत्वयोः परीक्षणमेव न्यायशास्त्रस्योद्देश्यमास्ते। अतएवेदं परीक्षाशास्त्रमप्यभिधीयते। यदा स्वार्थिभिः स्वार्थवशात् वेदोक्तनामर्थानाम् क्रियते स्म तदा वेदस्य अर्थ- याथात्म्यसंरक्षणाय तर्कप्रमाणाभ्यां सदर्थस्य समर्थनाय न्यायशास्त्रस्य अवतरणमभूत्। तथा चाह सर्वसिद्धान्तकारः न्यायदर्शनस्य प्रयोजननिरूपणावसरे-

**"नैयायिकस्य पक्षोऽयं संक्षेपात् प्रतिपद्यते।**

**यत्तर्करक्षितो वेदो ग्रस्तः पाषण्डदुर्जनैः।।**" इति।

गौतमः वेदान् प्रामाणिकान् सत्यान् च स्वीकरोति।

**न्यायशास्त्रस्य महत्त्वम् -** विदुषां गोष्ठ्याम् न्यायशास्त्रस्यातीव समादरो वत्र्तते। विना न्यायाध्यननं पांडित्यं न हि आयाति इति परीक्षकाणामभिप्रायः। न्याये प्रवेशे संजाते सर्वेषु शास्त्रेषु प्रवेशः सुलभो भवति। तथा चाभिधीयते-

'**गौतमप्रार्थितं शास्त्रं सर्वशास्त्रोपकारकम्।**' इति।

न्यायशास्त्रस्य तेन प्रकारेण अन्यैः दर्शनैः साकम् सांगत्यम् जातम् येन प्रायेण सर्वेषु एवं शास्त्रेषु न्यायदर्शनस्य पारिभाषिकाणां शब्दानां प्रचुरः प्रयोगो दृश्यते। मन्वादिकानांमहर्षिणामपि समये न्यायशास्त्रं समादृतमासीत् इति 'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इति वाक्येन द्वारा ज्ञायते। चतुर्दशविद्यास्वपि न्यायशास्त्रमन्यतमं स्थानं बिभर्तीति निम्नांकितेन श्लोकेन ज्ञायते। तथा च श्लोकः -

'**पुराणन्यायमीमांसा धर्मशास्त्रांगमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।**' इति।

आन्विक्षिक्याः विद्यायाः विषये कौटिल्येनाभिहितम्

'**प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणाम् शश्वदान्विक्षिकी मता ।।**' इति।

**न्यायकारः गौतमः -** न्यायदर्शनस्याद्यप्रवत्र्तको गौतमो वर्त्तते। पुराणेषु, महाभारतस्य, शान्तिपर्वणि, वाल्मीकिये रामायणे चापि गौतमस्य महर्षेः नामायाति। न्यायदर्शनसूत्राणां प्रणयनकर्तारूपेण तु गौतमः प्रसिद्ध एवास्ति। गौतमस्यैकं नामाक्षपाद अप्युपलभ्यते।

**गौतमाभिमताः षोडशपदार्थाः** न्यायदर्शनस्यादिमे एव सूत्रे महर्षिः गौतमः स्वाभिमतानां षोडशपदार्थानामुद्देशमकार्षीत **'**प्र माण-प्रमेय- संशय-प्रयोजन-दृष्टांत-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा- हेत्वाभास-छल-जाति-निग्रहस्थानाना तत्त्वज्ञानानिःश्रेयसाधिगमः **'**। इति।
अस्मिन् सूत्रे परिगणिताः पदार्थाः निम्नांकिताः सन्ति।
(1) प्रमाणम् (Means of Knowledge), (2) प्रमेयः (Objectof Knowledge), (3) संशयः (Doubt), (4) प्रयोजनम् (Purpose), (5) दृष्टांत (Example), (6) सिद्धान्त (Conclusion), (7) अवयवः (Members of Iyllogism), (8) तर्कः (Hypothesis), (9) निर्णयः (Verification), (10) वादः (Arguments), (11) जल्पः (Wrangling), (12) वितण्डा (Sophstry), (13) हेत्वाभासः (Fallacy), (14) छलः (Covalling), (15) जातिः (Futile Refutalion), (16) निग्रहस्थानम् च (Paints of Defeat)।

**न्यायदर्शनस्य विषयः -** न्यायदर्शनस्यः मूलग्रंथः **'**न्यायसूत्रम्**'** वर्तत्ते। अस्मिन् ग्रन्थे पंच अध्यायाः सन्ति। प्रत्येकस्मिन्नध्याये द्वौ-द्वौ आह्निकौ स्तः। अस्मिन् ग्रन्थे पंचशतसंख्याकानि **(500)** सूत्राणि सन्ति। न्यायसूत्रस्य विषयाणामध्यायक्रमेणाधस्तात् उपस्थापनं क्रियते। तथाहि-

**प्रथमोऽध्यायः -** प्रथमाध्यायस्य प्रथमाह्निके पदार्थोद्देशान्तरप्रत्यक्षा- नुमानोपमानशब्दाख्यानाम्, प्रमाणानाम् लक्षणं कृतमास्ते। ततः प्रमेयस्य लक्षणम् विभागश्च कृतो वर्त्तते। प्रमेयेषु-आत्म-इन्द्रियं-अर्थ बुद्धि-मनः - प्रवृत्ति- दोष-प्रेत्यभाव-फल-दुखापवर्गाणां निरूपणं कृतमास्ते। संशयप्रयोजन- दृष्टान्तानां निरूपणानन्तरम् सिद्धान्तोऽस्ति निरूपितः। तत्र चतुर्विधाः सिद्धान्ता उक्ताः सन्ति - (1) सर्वतंत्रसिद्धान्तः, (2) प्रतितन्त्रसिद्धान्तः, (3) अधिकरणसिद्धान्तः, (4) अभ्युपगमसिद्धान्तश्च। पुनरत्र-प्रतिज्ञाहेतूदाहरणोपनयाः निरूपिताः सन्ति। तदनन्तरम् तर्कनिर्णयोर्निरूपणं कृतमास्ते।
द्वितीयाह्निके - वाद-जल्प-वितण्डानाम्, सभेदानाम् हेत्वाभासानाम्, त्रिविधस्य छलस्य, जातेः निग्रहस्थानस्य च निरूपणमास्ते।

**द्वितीयोऽध्यायः** अस्मिन्नध्याये सपूर्वपक्षस्य संशयस्य प्रमाणचतुष्टय – विषययोः पूर्वोत्तरपक्षयोः,प्रत्यक्षानुमानोपमानशब्दप्रमाणविषयकाणामाक्षेपाणाम्, तेषां समाधानानां शब्दानित्यत्वसाधनस्य, जात्याकृतिव्यक्तीनां लक्षणस्य च वर्णनं कृतमास्ते।

**तृतीयोऽध्यायः -** अस्मिन्नध्याये आत्मादिकानां द्वादश प्रमेयाणां परीक्षायाः, देहेन्द्रियात्मवादादिकानां नास्तिकमतानां खण्डनस्य, आत्मनित्य- त्वप्रतिपादनस्य, इन्द्रियार्थयोः भौतिकत्वस्य बुद्धिमनसोः परीक्षायाश्च वर्णनमास्ते।

**चतुर्थोऽध्यायः-** अत्र प्रवृत्तिदोषयोः व्याख्या, जन्मान्तरविषयकः सिद्धान्तः, दुःखापवर्गयोः समीक्षा, अवयवावयविनोः सबन्धः प्रभृतयो विषयाः वर्णिताः सन्ति।

**पंचमोऽध्यायः -** अस्याध्यायस्य प्रथमाह्निके जातेः चत्वारिंशत् प्रभेदाः। द्वितीयाह्निके च द्वाविंशतिप्रकारकाणि निग्रहस्थानानि च सन्ति वर्णितानि।

**न्यायदर्शनसाहित्यम् -** गौतमादारभ्य वर्तमानकालं यावद् न्यायदर्शनस्य महती समृद्धिस्संजाता। तच्चात्र संक्षेपतो निरूप्यते। गौतमकृतम् न्यायसूत्रम्, वात्स्यायनकृतम् न्यायभाष्यम्, उद्योतकरकृतम् न्यायवार्तिकम् वाचस्पतिमिश्रकृता न्यायवार्तिकतात्पर्यटीका, उदयनाचार्यकृता न्यायवार्तिकतात्पर्यपरिशुद्धिः वर्द्धमानकृतः न्यायनिबन्धप्रकाशः पद्मनाभकृता न्यायनिबन्धप्रकाश टीका चेति ग्रन्थाः न्यायदर्शनविषयकाः ग्रन्थाः सन्ति।
विश्वनाथनागेशाभ्यां कृते न्यायसूत्रवृत्ती, जयन्तकृता न्यायमंजरी, महादेवभट्टकृता मितभाषिणी, राधामोहन-मुकुन्ददास-चन्द्रनारायणैः कृतानि न्यायसूत्रविवरणानि त्रीणि, अभयतिलककृता न्यायवृत्तिः, वाचस्पतिकृतः न्यायसूत्रोद्धारः - इतीमे ग्रन्थाः न्यायसूत्रस्य टीकास्वरूपाः सन्ति।
उदयनाचार्यस्य- न्यायकुसुममांजल्याः सप्तसंख्याकाः टीकाः सन्ति - प्रकाश -मकरन्दविवेक-विकास-विवरणाख्याः पंच वरदराजचन्द्रनारायणाभ्यां कृता टीकाश्च। आचार्य विश्वेश्वकृताऽपि टीकास्य ग्रन्थस्य समुपलभ्यते। आत्मतत्त्वविवेकस्य उदयनलिखितस्य वर्द्धमान-मथुरानाथ-हरिदासमिश्रैः पृथक् पृथक् टीकाः कृताः सन्ति।
वरदराजाचार्यस्य तार्किकरक्षायाम्-प्रकाशिका न्यायकौमुदी- निष्कण्टकाख्याः टीकाः सन्ति। गंगेशोपाध्यायस्य तत्त्वचिन्तामणेः वासुदेवसार्वभौम -पक्षधरमिश्र- हनुमान्तर्कचूडामणि- रघुनाथतर्कशिरोमणिभिः- कृताः पृथक् पृथक् पंच व्याख्याः सन्ति।
तत्त्वदीधितेरपित- जागदीशी – गादाधरी- मथुरानाथी - भवानन्दी-मयूखाभिधानाः पंच टीकाः सन्ति।
तर्कभाषायाः एव रामलिंग- माधवदेव – सिद्धचन्द्र – मुरारि - माधवभट्ट - चित्रभट्ट - व्यंकटाचार्य - गोवर्द्धन - शुभविजय-गणेशदीक्षित-वागीश-गौरीकान्त - विश्वनाथ-न्यायप्रदीपकृत-कौण्डिदण्डदीक्षित-गोपीनाथ-भास्कर-नागेशदिनकरा-ख्यैः विद्वद्भिः विरचिताः पृथक् अष्टादशसंख्याकाः टीकाःसमुपलभ्यन्ते। इत्थम् न्यायदर्शनस्य साहित्यमतीव विशालं वर्त्तते

♦♦♦♦♦♦♦